नं० ४९६३

नाम - निर्वाण तंत्रम्

कर्त्ता - ×

पत्र संख्या - ६ पत्राणि सं० ×

विषय० - तंत्रम्

निर्वाणतंत्र त्रयोदशचतुर्दशपटलौ

४८६३

4863
6

Complete

धार्मशास्त्रसं न्यासविधान व

श्रीगणेशायनमः श्रीचंडिकोवाच स्वयात्मकंदशार्णंचपुरैवकथितंतुमे प्रकाशरूपेतन्मंत्रंकथयस्वदयानिधे

श्रीशंकरउवाच श्रृणुदेविप्रवक्ष्यामिमंत्रंदशाक्षरंपरं यस्यश्रवणमात्रेणमूढोपिविष्णुरूपधृक् पुंमंत्रोपिच

देवेशिशक्तिमंत्रंपठेद्यदि अज्ञात्वातन्महामंत्रंसभवेद्ब्रह्मराक्षसः अज्ञात्वातन्महामंत्रंतत्वज्ञानीभवेद्यदि न(

थापितरकंगच्छेद्दिनिदेवस्यसंमतं श्रृणुदेविप्रवक्ष्यामिदशार्णंमंत्रमुत्तमं मायाबीजंवधूबीजंलक्ष्मीकालीचपा

शकं गगनंपक्षिबीजंचवह्निकांतानतःप्रिये इतितेकथितंकांतेदशाक्षरमनुत्तमं यत्ज्ञात्वात्वादमरत्वंचलभते।

नात्रसंशयः अस्यग्रहणमात्रेणनरोनारायणोभवेत् अस्यप्रसादमात्रेणदंडीनिर्वाणतांव्रजेत् दंडोपरिज

पेदेतद्दशार्णंपरमेश्वरि अस्यमंत्रान्महामंत्रंजायतेनात्रसंशयः सर्वेदेवासदाराश्चदशार्णंजायतेध्रुवं।

महाविद्योपासकश्चदशार्णंनहिपश्यति इहलोकेदरीद्रश्चपरेचब्रह्मराक्षसाः तस्माद्यत्नेनदेवेशिदशार्णं

श्रावयेद्गुरुः केवलंश्रवणंकुर्यान्नजपेत्साधकोत्तमः यः श्रावयेद्दशार्णंचसनरोगुरुरुत्तमः मंत्रदानायद्यदि एम·
१

वितथैवसगुरुस्मृतः दशार्णदातायोदेविसएवपरमोगुरुः यथामरंतरंगिन्यामसमाः सकल्पायगाः दशार्णस्यसमो
नास्तिमंत्रोपिसुरपूजिते त्वत्समायदिनारीचमत्स्मः पुरुषोस्तिच दशार्णस्यसमंमंत्रंकथयामिवरानने दशार्णस्य
महामंत्रस्यसदृशंनास्तिशैलजे दशार्णस्यसमंमंत्रः कथयत्वंतदाप्रिये श्रीप्रसादोमहामंत्रोदशार्णः परमेश्वरि उ
र्ध्वाम्नायमहातंत्रेमाहात्म्यंकथयामिते अतःपरंप्रवक्ष्यामियद्रूपंदंडधारिणं साधुरूपोगृहस्थस्यब्राह्मणोब्रह्मवा
दिनः सर्वमायापरित्यक्तः सदाब्रह्मपरायणः जितेंद्रियोजितक्रोधः समत्वंसर्वजातिषु पुत्रेरिपौसमत्वंचसमंस्व
र्णेचपार्थिवे दयाभावश्चसर्वत्रपुत्रेमित्रेरिपौभवेत् लाभालाभेजयेनाशेनिंदायांपोष्टकेतथा कायेप्राणेनसरब्ध
मसुरघयुगांत्तिके ब्रह्मज्ञानंविनाज्ञानंयस्यचित्तेनविद्यते संन्यासधर्मेतस्यैवनान्यस्यसुरपूजिते संन्यासधा
धारणंकार्यं विप्रस्यमुक्तिहेतवे योविप्रंधारयेदंडं सचनारायणः स्वयं चतुर्भुजाः प्रजायंतेदंडधारणमात्रतः
सर्वलक्षणसंयुक्तोब्राह्मणोगमनंचरेत् गत्वाचदंडिनंदृष्ट्वाप्रणमेद्दंडवद्भुवि त्वमेवदेवदेवेश त्वमेवत्राणकारकः

त्वमेव जगतां वरद्यः त्राहि मां शरणागतं इति श्रुत्वा दंडधारी पप्रच्छ सादरं वचः कस्त्वं कस्य सुतस्त्वं हि किमथागमनं वद ।
श्रुत्वा तद्वचनं विप्रः प्रोवाचात्मनिवेदनं विप्रवंसे समुत्पन्नो ह्यमुको हं विवेकवान् नास्ति मे पितरौ साक्षान्नास्ति मे स्त्रीसु
तादयः मत्सुंचमाना पितरौ मत्तात्मा नादयस्मृताः पश्चात्त्वकांतानाशे तु अहमत्यंततापवान् अतएव हि भो स्वामि
न्देहि मे परमाश्रयं सत्यं कुरु द्विजश्रेष्ठ यदुक्तं वै मम सांतिके मिथ्याभाषणदोषं तु त्वमस्य वर्त्ये विवर्जितः भवसे वन संरेहो
द्विज मत्पुरतो वद । स्थितायां यौवनायां च कांतायां परमेश्वरि सर्वं हि विफलं तस्य यः कुर्याद्दंडधारणं पितरौ विद्यते देवि यः
कुर्याद्दंडधारणं संन्यासं विफलं तस्य रौरवाख्यं च गच्छति विधवे बालभावश्च यस्य कांतासुतस्य च संन्यासधारणं तस्य
वृथा हि परमेश्वरि स गुरुश्चापि शिष्यश्च रौरवाख्यं च गच्छति इत्यादि दृढवाक्यं तु श्रुत्वा दंडी जितेंद्रियः संन्यासदानं न
सैवदद्यान्मुक्तिं च शाश्वतिः आदौ दशाक्षरं मंत्रं प्रथमे श्रावयेद्गुरुः तच्छ्रुत्वा महामर्त्यगमनं कारयेत्ततः क्रोशं वा
क्रोशयुग्मं वा वेगेन गमनं चरेत् गुरूणां सह शिष्येण दृष्टेदृष्टे विधावतः निषतिष्ठ महाबाहो मां त्यक्त्वा नाहि ग एम २

छतु शिष्य: परमहंसस्त्वं त्वत्समो नास्ति भूतले संतसमपराधं मे त्वमेव विष्णुरूपधृक् त्वमेव जगतांवंद्यस्त्वमे
व सुरपूजित: त्वमेव परमो हंसस्तिष्ठ निष्ठंतु मा व्रज सशिष्यदंडिना देवि इति वाक्यं वदेत्ततः अत: स परमो हंस: प
पिशते परमाहितः तस्यैव दर्शनार्थाय चांतरिक्षचर देवता: सस्त्रीका: सपरिवारा: आयांति दिक्षु विदिक्षु चारणास्मिन्स
मये दंडी शांताय शिष्यमुत्तमं कृतकारं बहुलं दत्वा मंत्रेणानेन सुव्रते फूत्कारैः कुप्रयोगवशात्पुनः प्राणं प्रयोजये
त् जन्मांतरं तु तस्यैव तत्क्षणे जायते किल जन्मांतरं समालोक्य संस्कारमाचरेद्गुरुः दंडांतिके समानीय संत
माशनमाचरेत् अमुकस्यं समाभाष्य पुष्पं वह्नौ विनिक्षिपेत् इति नम्नानुसंस्थाप्य तु संस्थाप्य महासंस्कारमा
चरेत् ततोपि दंडिना देवि शिष्याय ज्ञानहेतवे शृणु शिष्य महाधीर महावाक्यं हृदयं कुरु जन्मांतरं तस्यैव प्रथि
व्यां नाधिकारिता मत्तदेहस्वरूपो यं शत्रोयं न च संशय: विरतो भव सर्वेत्र नो पापघाहरचेष्टया आस्मरणे नैव पद्हृतं
तन्मात्रं भोजनं तव पंचतत्वं सदा सेव्यं गुह्यभावेन पार्वति सदैव मानसीं पूजां सदा मानसतर्पणं त्रिसंध्यं मानसं

३ पार्गनाभिकुंडेप्रपत्ततः सदैवमानसंभोगंत्यागंकुरुमयत्नतः अपवर्गपुनोभूत्वानरनारायणः स्वयंभवत्येवनसंदे
होदंडधारणमात्रतः पितृवंशेसप्तदशमातृवंशेत्रयोदश कांतायाः सप्तमश्चैवलक्ष्मीनारायणोभवेत् इतिश्रुत्वा
3 वचस्तस्यशिष्यस्तमब्रवीद्वचः यदुक्तंमयिमुक्त्यर्थंतत्करोमिनिरंतरं पंचतत्वंसदासेव्यंकस्माद्भावाद्वदस्वमे यत्रैवद
वर्तितेदंडीबहुशिष्यसमावृतः तत्रगत्वाप्रयत्नेनपंचतत्वविचेष्टया अथवावीरमध्येतुयत्नेनगमनंचरेत् तत्वज्ञानी
गृहस्थस्यसंनिधानेव्रजेत्किल सुदूरमपिगंतव्यंपत्नीस्तेकुलनायका भिक्षाचर्यानचस्त्रार्थंदेवनायाः कृतेपुनः
आचार्यपत्नीदृष्ट्वातुभिक्षांकुर्यात्समाहिता हेमातर्देहिमेभिक्षांकुंडलिनींतर्पयाम्यहं एवमुक्त्वाततोदंडीमहासं
स्कारमाचरेत् दंडांतिकेसमानीयहोमयेद्विधिपूर्वकं ततोहुनेत्करंधृत्वा आत्मेवचाहुतिंपुनः विपरीतक्रमेण
वकुर्याद्विहुविशोधनं ततः कुर्यात्प्रयत्नेनछेदनंयज्ञोपवीतकं शिखांतस्यशिखामंत्रैयज्ञमध्येनिपातयेत् मू
लेनयज्ञसूत्रंतुतत्स्थानेवनिवेशयेत् धृतेमृत्तिकयाःपुष्पंविलिप्यशोषयेत्ततः तत्पुष्पंमूलमंत्रेणकुंडमध्ये एम
३

विनिक्षिपेत् पूर्णाहुतिं ततो दद्यात्पुष्पमानयेत्सुधीः सर्वज्ञस्तत्र सशिखं तत्पुष्पं शेषये मूलमंत्रं जपेत्तत्र गजा
नकसहस्रकं ततश्च श्रावयेन्मंत्रं कालिकायाश्च सुंदरी अथवा श्रावयेन्मंत्रं नारायणाश्च सुदुर्लभं मूलमंत्रं समु॰
च्चार्य पुष्पं भस्म प्रयत्नतः भस्मना तत्स्मरणात् साक्षाद्दंतं यज्ञोपवीतकं वानप्रस्थस्य वनसंदेहो नरो नारायणः स्वयं वि
ल्वदंडं समानीय वंशस्यैकं समानयेत् विल्वदंडे न्यसेन्मंत्रान् कालिकायाः प्रयत्नतः जीवन्यासं ततः कृत्वा
दंडे देवीं विचिंतयेत् विल्वस्थितं च चैतन्यं वंशदंडे नियोजयेत् इष्टदेवीस्वरूपोयं दंडोयं परमेश्वरि शिष्यस्य
दक्षिणे हस्ते दंडस्थापनमाचरेत् कमंडलुं समानीय वारुणं प्रजपेत्सुधी वारुणीं निक्षिपेत्तत्र ततो मूलमधा
रयेत् दंडधारणमात्रेण नरो नारायणो भवेत् अद्यावधि महामायां दंडोपरि विभावयेत् कुरु पूजां महाकाली
दंडोपरि विभावनात् साक्षान्नारायणस्त्वं हि रक्षया धर्मपरो भव न वमाता न पिता स्वामि सर्वं दंडात्मिके स्थिता ध्या
न ब्रह्ममनं कुर्यात् गृहस्थस्य द्विजस्य च नारायणं समाभाष्य द्वारे तस्य व्रजेत्सुधी इति श्रुत्वा गृहस्थश्च पूजांजलि

४ परो भवेत् वीरेश्वर दंडिनं दृष्ट्वा प्रणमेद्भूतराणेश्वरः भिक्षां दद्यात्स्वपत्नेन मधुमांसं विना प्रिये आदाय भिक्षां देवेशि चौ
रवत्कमनं चरेत् तया हि नगरं गत्वा त्रिरात्रिं वसतिं चरेत् तीर्थभूमिं ततो गत्वा सप्तरात्रिं वसेत्ततः न्यासरतो दंडिनं दृ
५ ष्ट्वा प्रणमेद्विधिपूर्वकं तोयपूर्णं च देवेशि किंवा शून्यकमंडलुं दृष्टिमात्रेण तत्पात्रं पूर्णं कुर्याद्द्विजोत्तमः कुशा
ग्रमानं यद्विंदु यद्दद्यात्कमंडलौ समुद्रसप्तदानस्य फलं स लभते ध्रुवं न दद्याद्यदि मोहेन समवेदाप दाश्रयः
त्रिंशद्वर्षसहस्राणि स एव विदुषो भवेत् इति ते कथितं चंडि संन्यासधारणं परं न वक्तव्यं पशोरग्रे प्राणांते पि क
दाचन इति श्रीनिर्वाणतंत्रे चंडिकेश्वरसंवादे संन्यासविवरणे नाम त्रयोदशः पटलः ॥ ॥ श्रीशंकर उवाच ।
शृणु देवि प्रवक्ष्यामि अवधूतो यथा भवेत् वीरस्य मूर्तिं जानीया सदा तत्परात्परम् यद्रूपं कथितं पूर्वं संन्यासं धारणं प
रं तद्रूपं सर्वकर्माणि प्रकुर्याद्वीरवल्लभः दंडिनामुंडनं चैव अमायां सनमाचरेत् यथा तथा नैव कुर्याद्वीरस्य मुंडनं प्रि
ये असंस्कृतं केशजालं मुक्तालं दिकचाद्वयं अस्थिमालाविभूषा वा रुद्राक्षान् वापि धारयेत् दिगंबरो वा वीरेंद्रश्वा राम०

थवाकोपिनीभवत् रक्तचंदनदीग्धांगः कुर्यान्नस्यांगमूषणं साम्राध्यानंतपोदानंबालभावेनशैलजे शिवोहंभैरेः
वानंदोमुक्तोहंकुलनायकः एवंभावपरोमंत्रीहेतुयुक्तोसदाभवेत् संविदासेवनंकुर्यात्कारणंसेवनंभवेत् साक्षात्सपु
रुषः — शंभुरूपोनसंशयः शि निर्वाणमुक्तिमाप्नोतिब्राह्मणोवीरभावतः अवधूतस्तत्रियश्च महायोगीनसंशयः स
रूपोभावयेद्वैश्यः शूद्रोपिसहलोकवान् संपूर्णंफलमाप्नोतिविप्रोनिर्वाणतांव्रजेत् त्रिवर्गफलमाप्नोतिक्षत्रियोवीरभाव
तः पादद्वयंतुवैश्यस्यशूद्रस्यचैकपादकं ब्राह्मणस्यविनान्यस्यसंन्यस्तंनास्तिचंडिके कुर्यान्मोहेनयोन्यश्च महापापा
श्रयोभवेत् गुप्तभावेनदेवेशिशृणुमत्प्राणवल्लभे संन्यासिनांसदासेव्यंपंचतत्वंवरानने द्वादशाब्दस्यमध्येतुयदिस्म
युर्नजायते दंडंतोयेविनिक्षिप्यभवेत्सपरमहंसकः अवधूताचाररतोहंसःपरमपूर्वकः सएवानंदविख्यातोद्वादशाब्दे
सरस्वती अवधूतस्यचाख्यातंशृणुषपर्वतात्मजे वनारण्यभारतीचगिरिश्चपुरिरेवच एकत्रस्थानेचसंस्थित्वाद्द
ष्टध्यानादिकंचरेत् योमंत्रदानतस्तातःसवनःपरिकीर्तिता भ्रष्टकेशोजयाजूटः सदावातुलवच्चरेत् अंतर्यागीम

५ हावीरो भरण्यं सैवशैलजे नानाशास्त्रेषुयोविद्वान्नानाकर्मविशारदः सदेष्टदेवीभावेनभावयेत् योहिचावलां सएव
5 भारतिवीरो महात्मानी जितेंद्रियः सदोधवाहुयोवीरो मुक्तकेशो दिगंबरः सर्वत्रसमभावेनभावयेद्यो नरोत्तमः इष्टदेवी
विनादेविसगिरिपरिकीर्तिता नानादेशेषुपीठेषुक्षेत्रेषुतीर्थभूमिषु भ्रमणंकुरुतेनित्यंकुर्याद्यत्नेनपूजनं देवता
याः सदाध्यानंश्रीगुरोः पूजनंतथा अंतर्यागेषुयोनिष्ठः सवीरः पुरिरेक्व अवधूताश्रमेदेवियस्यभक्तिश्चनिश्च
ला तस्यतुष्टाभवेत्कालीकिंनसिध्यंतिभूतले अवधूतंसमालोक्य शंभुवत्पूजनंचरेत् शक्तितः पंचतत्वानियत्
त्नेनैवनिवेदयेत् अशक्तः परमेशानिभक्तितः परितोषयेत् अवश्यंपूजयेद्वीरं गृहस्थः साधुरूपकः योनार्चयं
त्तिंवीरंसभवेत्पापदाश्रयः ब्रह्मचर्यंप्रवक्ष्यामिशृणुदेविसमाहिता यस्याचरणमात्रेणनरोनारायणोभवेत् गैरि
कंवसनंकुर्याद्देवताध्यानतत्परः फलमूलाहाररतोदुग्धंगव्यंसमाहरेत् शस्याभवंनगृह्णीयात्शूद्रानीतंतथा
जलं ऋतुकालंविनानैवस्वकांताभिगमनंचरेत् गृहस्थोपिमहेशानिब्रह्मचारीसदागुरुः उदासीनः कदाचि

एम·

५

द्गुरुः कर्माधियो भवत् तस्य शिष्यस्य कल्याणं कदाचिंनास्ति चंडिके नखलोमादिकं देवि नत्याज्यं ब्रह्मचारिणः सर्व
त्रैव दयाभावं सदैव ध्यानतत्परः त्रिशूलं धारयेच्चैव त्रिशिखां वापि धारयेत् ताम्रसुक्तं च रुद्राक्षं कर्णयुग्मे निवेशयेत्
यद्देशे विद्यते देवि ब्रह्मचारी तपोधनः तद्देशे तु स्थिरा लक्ष्मीर्जायते नात्र संशयः अथ वक्ष्ये गृहस्थस्य लक्षणं शृणु
चंडिके पाठो होमश्चातिथीनां सेवनं देवपूजनं पितृश्राद्धं कुलाचारं तत्वज्ञानं सदाचरेत् निजकांता सदा पूज्ये निजकांता
हि देवता मानसं पूजनं कुर्यान्मानसं जपमाचरेत् मानसे हि महाधर्मो मनसे नास्ति पातकं सर्वेषां पितृरूपो सोगृहस्थः
साधुरूपकः सदाचाररतः श्रीमान् सदा यज्ञपरायणः स्थापयेसंचतत्वानि गृहमध्ये प्रयत्नतः तदैव सर्वासद्धीशाभव
से कन संशयः यस्मिन्मंत्रे विचारेपि सिद्धारिगणादूषणं तत्तन्सर्वं विचारेपि गृहस्थस्य तु निश्चितं सुविचार्यमहामंत्रं
कुलीया त्साधको नमः एकाक्षरे तथा कूष्मालामंत्रादिदैविके विचारे नास्ति देवेशि स्वमेलब्धे तथैव हि तथापि च गृहस्य
स्य श्रममासाद्यतत्वतः तत्वज्ञाने प्रयोसक्तः मुक्तो भवति मानवः समुक्तः सर्वपापेभ्यः सैव साक्षान्महेश्वरः अंनदानेन

६ यत्पुण्यंतोयदानेनयत्फलं तत्सर्वंगृहस्थस्यनान्यस्यसुखंद्दिते इति तेकथितंकांतेचतुराश्रमलक्षणं नवक्तव्यं
पशोरग्रेप्राणांतेपिसुरेश्वरि. इतिश्रीनिर्वाणतंत्रेईश्वरचंडिसंवादेचतुर्दशः पटलः ॥ ॥ रामः. रामाः

१८०

निर्वाणतंत्र

राम० ६